# shrInivAsaguNAkaraH

# શ્રીનિવાસગુણાકરઃ

## Document Information

Text title : shrIshrInivAsaguNAkara

File name : shrInivAsaguNAkara.itx

Category : vishhnu, venkateshwara, stotra, vishnu

Location : doc_vishhnu

Author : shrIshailastAtayAchArya

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીનિવાસગુણાકરઃ

શ્રીઃ

અથ શ્રીવરદાચાર્યવિરચિતઃ શ્રીનિવાસગુણકરઃ ।

વાદિકણ્ઠીરવશ્રીમદ્વરદાર્યેણ ધીમતા ।

વ્યાખ્યા શ્રીવાસકાવ્યસ્ય લિખ્યતે પદયોજની ॥

શ્રીવેઙ્કટેશ્વરસ્તોત્રમારભતે–

શ્રીભૃત્સદ્વૃષગોત્રશેખરમણે વેદપ્રવક્તઃ શુચે

લોકાસ્વાદ્યચરિત્ર સુન્દરતનો ધીવારિભિઃ ક્ષાલિતે ।

સસ્વૈતદ્વરદક્ષિણા શુભગુણા સાલઙ્કૃતિર્વિસ્ફુર-

ત્સદ્વૃત્તા કવિતા મયા તવ પદે દાસેન ભાવ્યાઽર્પ્યતે ॥ ૧॥

વાણ્યાસ્યોઽસમદૃક્ સહસ્રવદનો ધોસત્પુરોધાઃસ્વભૂ-

હૃજ્જાદાત્તવરઃ પુરાણવરકૃત્ તત્પુત્રકસ્તત્સુતઃ ।

સેનેશો વરભાષ્યકૃત્ તવ પરા ઘણ્ટાઽહમલ્પં પરં

યૌષ્માકીનગુણાદિકં કથયિતું લક્ષ્મીશ શક્તો ન કિમ્ ॥ ૨॥

વ્યોમાબ્જાયિતસીમભૂમિકમપિ શ્રીભૃદ્ભવદ્વૈભવં

તાવચ્ચિત્સુલભં ધૃતામૃતરસમ્ સઞ્જીવનૈકૌષધમ્ ।

યાવચ્છક્તિ વદામિ યામિ સુસુખં તેનૈવ કાર્ત્સ્ન્યેન કઃ

પાનાશક્ત ઇતિ પ્રભુઞ્ચતિ પયો ગાઙ્ગં સતૃટ્ચેતનઃ ॥ ૩॥

વાણીનાથમુખામરર્ષિશઠજિદ્રામાનુજાર્યાદિવા-

ઙ્જાલે સત્યપિ શબ્દશક્યશુભતાયુક્તે ત્રયીભાવિનિ ।

કાઙ્ક્ષેથે પિતરૌ મમૈવ મધુરં શબ્દં યુવાં શ્રીહરી

લોકેઽગ્ર્યાત્મજવાક્યયે સતિ શિશોરવ્યક્તશક્યં [બ્દં] યથા ॥ ૪॥

અઘટિતઘટનાયાં ત્વત્સમોઽસ્મિ પ્રસિદ્ધા

વૃષધરધવ સા તે પણ્ડિતંમન્યતેદ્ધઃ ।

નુતિકૃતિભરભારી દુર્ઘટં શાસ્ત્રદૃષ્ટ્યા

પરમિહ ઘટયામિ શ્રીશ શબ્દાર્થજાલમ્ ॥ ૫॥

પૂર્વં વ્યાસમનુપ્રવિશ્ય મહિતાનુચ્ચાર્ય શબ્દાન્ સ્વયં
તં પૂજાસ્પદમાતનોરસુપદે ત્વં ચૌર્ય [૨] વત્ કૌતુકાત્ ।
અદ્યૈનં સમનુપ્રવિશ્ય કુટિલાન્ શબ્દાનિમાનુચ્ચરન્
માં હાસ્યાસ્પદમાતનોષ્યપિ તથા શેષઃ કૃતાર્થોઽસ્મિ હિ ॥ ૬॥

નિશામુખનટન્મહાનટકિરીટકોટિસ્ફુર-
ત્સુધાનિધિગલત્સુધામિલિતગાઙ્ગભઙ્ગોપમમ્ ।
કવિત્વમિહ મે ભુવિ ત્વદનુષક્તિમદ્યુક્તિમ-
દ્વિધેહિ કમલાનિધે યુવનિપીતબાલાસ્યવત્ ॥ ૭॥

ઇચ્છા સિદ્ધે ન ભજતિ જનિં કિન્તુ સાધ્યે મમેદં
ચિત્રં ચિત્તં સ્વસહજતયા શેષતામેવ સિદ્ધામ્ ।
લિઙ્ગદ્વન્દ્વસ્ફુરદજડિમત્વત્સ્વરૂપાભિનુત્યૈ
વાઞ્છત્યુચ્ચૈર્વૃષધરશિરોનીલકલ્પક્ષમાજ ॥ ૮॥

રમાઽપિ કુસુમાધિકમ્રદિમપાણિના સેવતે
પ્રમાદરહિતૈવ યત્તવ તદઙ્ઘ્રિયુગ્મં પરમ્ ।
મમાપિ કઠિને હૃદિ સ્થિતતયૈવ રક્તીકૃતં
ક્ષમામિહ કુરુ પ્રભો વૃષધરેઽશક્તે મયિ ॥ ૯॥

કઠિને તે મમ ચિત્તે વૃત્તિઃ શક્યા ન ચેચ્છુભં કુર્વેતત્ ।
કુર્વન્તિ તથા લોકે નેદં ત્યાજ્યં વિભો કિમાયાસેન ॥ ૧૦॥

વિષ્ણો ત્વત્પદભાક્તરુવ્રજમિતો ધ્વાન્તચ્છલાન્નિષ્પિબન્
ધૂમાલિ વિબુધવ્રજં શુચિમુખં શુદ્ધાઃ કલાઃ પ્રાપયન્ ।
સ્વાઃ પીયૂષમયીર્વ્રતાત્તક્રશિમાધિક્યો વિશુદ્ધસ્ફુરત્-
સત્સઙ્ગોઽઙ્ઘ્રિરુહશ્રિયૈ ચરતિ તે શ્રીશ દ્વિજેન્દ્રસ્તપઃ ॥ ૧૧॥

અરુણતરુણતરણિ[કિરણ] વિકસજ્જલવર્તિજલજગર્ભાભમ્ ।
વૃષગિરિધિવ તવ ચરણં શરણં કરવાણ્યનર્ઘશાતાર્થમ્ ॥ ૧૨॥

અમ્ભસ્સમ્ભરિતાલવાલબલવદ્વિશ્વમ્ભરારમ્ભવ-
દ્રમ્ભાસ્તમ્ભવિભઞ્જકઃ કરિકરઃ શેષાદ્રિચૂડામણે
સ્સારંસ્મારમુરુપ્રભં મ્રદિમભાગૂરુદ્વયં તે હ્રિયા
સઙ્કોચં મુહુરેતિ કન્દરમુખં પીત્વા વિષં યાતિં ચ ॥ ૧૩॥

નાભિર્નીલિમનીરનિમ્નસરસી યત્પદ્મમાસીત્તતઃ
ત્વચ્છ્વાસાનિલલૌલ્યભાજિ યુવયોઃ પિત્રોઃ પુરઃ પશ્યતોઃ ।
યત્રાનેકમુખાર્ભકો મધુરસવ્યાસાઙ્ગિભૃઙ્ગીચ્છટા-
સઙ્ગીતાબ્ધિતરઙ્ગસઙ્ગતમનાઃ પ્રાશ્નાતિ ડોલારસમ્ ॥ ૧૪॥

શ્વાસો મન્દમરુન્મણિસ્તુ મુકુરો મન્દસ્મિતં ચન્દ્રિકા
વેશ્મોરો વનમાલિકા વૃષધરેઙ્ડોલા તનુત્વિણ્ણદી ।
મધ્વાસ્વાદમદોત્પતન્મધુકરશ્રેણ્યમ્બુબિન્દૂત્કિર
દ્વાર્યન્ત્રં તવ નાભિવારિજમિદં લીલાભિક્લપ્ત્યૈ શ્રિયઃ ॥ ૧૫॥

કુક્ષિસ્થત્રૈલોક્યગલોકૌઘવિમર્દપ્રાપ્તોચ્છૂનત્વોદયભાજો વલયસ્તે ।
તત્સીમાકારા વલિસન્ધ્યઞ્ચિતરેખાઃ શેષક્ષ્માક્ષોણિભૃદ્ધવ
લક્ષ્મીશ વિભાન્તિ ॥ ૧૬॥

કુક્ષિન્યસ્તજગત્રયીજનઘટાસંમર્દજોચ્છૂનતાસમ્ભૂતા
વલયશ્ચ સન્ધય ઇમાસ્તત્સીમરેખા ઇવ ।
સદ્ધીરોદરબન્ધનં વિજયતે તદ્ધારણાદક્ષતા
સન્દેહારચિતં વૃષાચલશિરશ્ચૂડામણે શ્રીનિધે ॥ ૧૭॥

શ્રીવત્સચિહ્નવક્ષાઃ શ્રીવત્સલતાતિશાયિવાત્સલ્યઃ ।
શ્રીવત્સસક્તચિત્તઃ શ્રીવસ્તજિદાકૃતિર્હરિર્જીયાત્ ॥ ૧૮॥

તટિત્પટુકુટીરભાપટલહેમપેટીરમા-
ઘટીકુચતટીલસત્તરપટીરપઙ્કાઙ્કિતમ્ ।
નમદ્ધૃદય પશ્યતોહરતરં તવોરસ્સ્થલં
ધગદ્ધગિતસદ્દૃષદ્વૃષધરેશ ચિત્તેઽસ્તુ મે ॥ ૧૯॥

ફુલ્લેન્દીવરગુચ્છસુન્દરશિખા પ્રાન્તસ્ફુટાબ્જા
તતોઽધસ્તાદ્ગુચ્છયુગાઞ્ચિતાગ્રન્ત વિલસન્મલ્લ્યગ્રસત્પલ્લવા ।
અપ્રાપ્તોપમગન્ધકાન્તિમૃદુતાવ્યોમામ્બુજમ્લાનતા ન્યસ્તા
ચમ્પકમાલિકોરસિ વિભો કેનાપિ શુદ્ધેન તે ॥ ૨૦॥

એકા ત્વત્પદજા સમુદ્રમગમત્સિન્ધુઃ પરા વાર્ધિજા ત્વાં
શેષદ્રિગૃહં શ્રિતા ચકચકન્નીરા લસચ્છૈવલા ।
સ્વબ્જેન્દીવરશઙ્ખચક્રમિથુનાવર્તા સ્ફુરત્સૈકતા
સ્મૃત્યાઽપ્યર્થિતજીવનાદિફલદા પાપાપનોદક્ષમા ॥ ૨૧॥

ત્વદ્દૃક્પુષ્પવદંશુજાર્ધહસનસ્વાપં
મધુપ્રાડ્માસોપાનૈર્વલિભિસ્સમેત્ય શિશવે નાભીજુષે ચારુજે ।
દાતું સ્વૌષધિકાજયમબ્જમનિશં હસ્તે વહન્તી ભવદ્-
વક્ષસ્થાભવરોગિણે દિશતિ મે કિં નામૃતં સત્કૃપા ॥ ૨૨॥

શ્રીસ્ત્વલ્લોચનપુષ્પવત્કરચયૈરર્ધપ્રબોધં મધુ-
ભ્રાજયબ્જં તવ નાભિપદ્મશિશવે વલ્યાખ્યસોપાનકૈઃ ।
ગત્વા દાતુમિવૌષધોજ્જ્વલધૃતં શઙ્ખં વહન્તી ભવદ્-
વક્ષસ્સ્થા ભવરોગિણે દિશતિ મે કિં નામૃતં વત્સલા ॥ ૨૩॥

પશ્ચાદ્બાહુયુગેન પદ્મયુગલે લક્ષ્મ્યા સમીપં સ્વકં
નીતે તાવકમીક્ષણં દિનકરશ્ચન્દ્રશ્ચ ગોવ્યાપનૈઃ ।
એકં વિસ્ફુટયન્ પરં મુકુલયન્નિત્યં સભૃઙ્ગસ્વનં
તસ્યા વક્ત્રરુચિં કલાં કુચરુચિં કિં પ્રાપયત્યચ્યુત ॥ ૨૪॥

ચઞ્ચલ્લોકજયેચ્છપઞ્ચવિશિખજ્યાવાહરાવાવલી-
સ્વાદુત્વાપહમાધુરીરસપિબદ્વાચાસુધાશીકરૈઃ ।
જન્યાન્ધોમહતીસમુદ્ગતકલાદેશૈસ્ત્વદીશશ્રુતિં
માતસ્સિઞ્ચસિ મા કથં મમ કૃતે વીક્ષ્યાપિ મે ભદ્દશામ્ ॥ ૨૫॥

ભોગી ચન્દનગન્ધસઙ્ગમૃદુતાવૃત્તાયતત્વૈર્ભવદ્-
બાહુશ્રીજયદીધીરિતો વૃષગિરિં મત્વા જગદ્રક્ષણાત્ ।
બાહોઃ પોષ્યઘનાચ્ચ ભક્ષિતજગત્પ્રાણં ઘનદ્વેષયુક્-
સ્વં ન્યૂનં તવ વીક્ષ્ય કેતનમગાદ્વલ્મીકરન્ધ્રં ભયાત્ ॥ ૨૬॥

વારાશિજાદિનિજનારીસમૂહકુચનીરોત્થકુડ્મલગણે
તારેટ્કલાનિકરમૂરીકૃતોલ્લસનભીરઞ્ચિતં કૃતવતી ।
સ્ફારાઙ્ગુલિવ્રતતિસારપ્રસૂનતતિરારાદ્ધૃતાઙ્કુશદશા
ક્રૂરાસુરેટ્કરિણિ હા રાજતે નખરપારમ્પરી તવ હરે ॥ ૨૭॥

અન્યાવાર્યાતિભીમપ્રતિકલરહિતાપારપાપ્માસ્મદીક્ષા
દોષાર્તૌ પુષ્પવન્તાવરિદરકપટૌ ત્વન્મુખેનેક્ષણોત્કૌ ।
ઇચ્છન્તૌ સાક્ષિતાં સ્વાં મદિતરવિષયાં પાપનુત્તિ નુ
નાત્તપ્રત્યુક્તી ત્વત્કુતો વા પરમિહ વસતઃ કિં વૃષક્ષ્માધરેશ ॥ ૨૮॥

ધરાધરધરાધરં તવ સુધાઝરીમાધુરી-
નિરાકૃતિધુરન્ધરં દૃઢતરં નિપીયાહવે ।

દરસ્તવ સુહૃદ્વિષોર્ધ્વનિમિષેણ હિ શ્રોત્રયોઃ
   સુધાગરલવૃષ્ટિકૃદ્ભવતિ પુષ્ટિનષ્ટ્યોઃ કૃતે ॥ ૨૯॥

સ્યાલં શ્રીશ દિનેદિનેઽક્ષતજલધ્યુત્પત્તિમસ્તોપમત્-
   વદ્વક્ત્રાભિભવેચ્છયાઽઽગતમથ ત્વત્પન્નખેન ક્ષતમ્ ।
હીતં પીતકલઙ્કુદુર્ભરગરં હા કાલચક્રે વિધું
   વિન્યસ્ય ભ્રમયસ્યજેન વિગરં કર્તું સ્વાત્તત્પિતુઃ ॥ ૩૦॥

મત્વાઽઽસ્યાક્રમણોત્કમક્ષિયુગલં ત્વચ્છ્મશ્રુરેખા નતા
   તન્મધ્યં તવ ચોન્નતાનુનયનેકૃન્નાસા જગામ શ્રુતિઃ ।
સ્વાનુલ્લઙ્ઘનધીઃ સમીપમલિકં ભ્રૂસીમલોલીકૃતે
   મૂર્ધન્યઞ્ચ કચં સ ભાગમપરં ભીત્યા કિમુ શ્રીનિધે ॥ ૩૧॥

ન્યક્કૃતકમલોલ્લસિતં શ્રુત્યન્તનિષક્તમસ્તમિથ્યાદૃષ્ટિક્ ।
દૃષ્ટ્વેવ ભક્તવૃન્દં દૃગ્દ્વયમાસીત્તથા વૃષાદ્રીશ ॥ ૩૨॥

આઘ્રાતું મુખમીશ કિન્નુ ભવતા કુન્દસ્રજઃ પ્રાપિતઃ
   કિં કારુણ્યસુધાબ્ધિફેનપટલી ચિત્તાદ્બહિર્નિર્ગતા ।
લગ્ના ત્વદ્વદનેન્દુપાનસમયે માધુર્યલોભાદ્ધરાત્
કિં લક્ષ્મીરથવા [રદભા] મુકુન્દ કિમિદં મન્દસ્મિતં તેઽથવા ॥ ૩૩॥

બન્ધૂકામ્બુજકુન્દચમ્પકસુમાન્યોષ્ઠાક્ષિદન્તાવલી-
   ઘ્રાણં મુખ્યરુચીહયા સમભવન્ યુગ્મં તુ સારઙ્ગયોઃ ।
શાખ્યન્તસ્પૃહયાલ્વદભ્રમહિમશ્રીદૃક્ત્વમાશ્રિત્ય કિં
   તત્ર શ્રીપ્રિય સર્વગન્ધરસસલ્લબ્ધ્યા સદા મોદતે ॥ ૩૪॥

આરાધ્યારાધન[ક]પરિશોધકવેદાવલીધિયૈ ભવતઃ ।
છન્દઃપ્રવક્તુરાસ્યે વિમલે રદમાલિકે ભવતઃ ॥ ૩૫॥

અઘટિતઘટનાલક્ષ્યં વક્ત્રેન્દૌ શ્મશ્રુતિમિરમેતત્તે ।
નાસાચમ્પકનિકટે ભ્રૂભૃઙ્ગશ્રેણિકેવ લક્ષ્મીશ ॥ ૩૬॥

જિત્વા પ્રાકૃતસાધનૈર્જગદથો સાધ્યેતરાંસ્તૈર્મુનીન્
   દિવ્યે તે ધનુષી ભ્રુવૌ રતિયુતસ્તૂણ્યૌ ચ જઙ્ઘે સ્મરઃ ।
વર્ષ્મેન્દીવરજાલમઙ્ઘ્રિકરદૃગ્વક્ત્રં ચ પદ્માન્યહો
   યત્નૈઃ પ્રાપ્ય ચકાર પૂરુષમણે તૈર્વલ્લવીસ્ત્વદ્વિટાઃ ॥ ૩૭॥

સારાચિરદ્યુતિકનીરાભિરામતરધારાધરાધિપઘટા

દોરાહવપ્રચયધીરાનુશાસિતભગોરાશિજાયુતતનો
સ્વારાણમુખાગ્રિમુખહીરાલિયુઙ્મકુટભારાજિદીપપટલી
નીરાજિતાઙ્ઘ્રિયુગ નારાયણાદ્યપરમારાદશર્મ હર મે ॥ ૩૮॥

વૃન્દીભૂતતમિસ્રબુદ્ધિકલયચ્ચણ્ડાંશુભામણ્ડલી-
શઙ્કામઙ્કુરયત્સુરત્નરુચિરં શેષાચલાધીશ્વર ।
બદ્ધં મૂર્દ્ધજકુડ્મલં કબલયન્નમ્રાધરાશ્યાગિરત્-
ત્વત્કારુણ્યકલામિવ પ્રકટયત્યેતત્ કિરીટં તવ ॥ ૩૯॥

અલિજલધરબલભિદુપલતિમિરલઘિમકલનસબલકબરરુચઃ ।
જનદૃગગુણપરિહૃતિમતિકૃતપરિવૃતિ
ભવતિ તવ નુ સુમ મકુટમ્ ॥ ૪૦॥

શ્રીભૃદ્ધ્રુદ્ધકચં શ્રમૈકફલદં કિં તે કિરીટં મહત્
ચિત્રં મન્મકુટં શિરસ્સ્થમપિ મે બિભ્રદ્ભરં ભાસયત્ ।
સદ્રમ્યં પરમં પદં ત્વવતિ તે પ્રાચીનમપ્યુત્તરં
સર્વસ્માત્પરિપૂરયત્યુરુતરાઃ સ્વાશા મહદ્વર્ણ્યતે ॥ ૪૧॥

સાક્ષિણ્યામતમા દયાં તવ ગતા સર્વાર્થવિન્માધુરીયુક્
શ્રુત્યન્તપદાભિરામનિનદા સર્વૈસ્ત્વદીયૈસ્સહ ।
ત્વદ્વર્ણૈવ સહસ્રધા નિકટભાગ્ભૂતે જગદ્દૂર્વહં
ત્વદ્ભૃન્મન્મકુટપ્રસિદ્ધિમધિકાં શ્રીવલ્લભ શ્રૂયતામ્ ॥ ૪૨॥

શેષત્વેન નિરૂપિતં ગુરુવરૈસ્તચ્છેષતામાશ્રિતૈઃ
સ્વામિત્વં નિરુપાધિકં ભજદહો નિર્દોષમત્સ્વત્વભાક્ ।
લક્ષ્મીભાગધરીકૃતં તુ ભવતા લોકાનુકૂલં પુરા
ત્વામુદ્વાસ્ય તવ પ્રભુત્વમકરોન્નો વેત્સિ કિં તત્પ્રભો ॥ ૪૩॥

ગાવો યત્ર નિરૂપ્યમાણવિલસદ્રૂપાનુગચ્છિદ્દૃદઃ
સોત્કણ્ઠા વિચરન્ત્યહો સુમનસાં પદ્માડપ્યજાનાં ગવામ્ ।
શીર્ષેષુ પ્રતિભાતિ નિર્મલદૃશામ્ ત્વદ્ભત્યુપાયાત્મતા
યસ્મિન્નેવ વિભાતિ તેન સદૃશં લક્ષ્મીશ કિં વર્તતે ॥ ૪૪॥

ગેહાદેર્મનુજાસ્ત્રિવિષ્ટપસદસ્તેષાં પયોજાસનઃ
તેષાં તસ્ય ચ વેઙ્કટાચલપતે શ્રીશસ્ય તે શ્રીશ પાદદ્વયમ્ ।
યત્તસ્યાપિ હિ પાદુકામણિમયં સંરક્ષકં પુંમણિવ્યાકીર્ણં
તદનન્યરક્ષકકથં માં સર્વદા રક્ષતુ ॥ ૪૫॥

સ્તોત્રં ગોત્રાપતીનાં ન કુરુ મુખ મુધા સ્વાય તે જ્ઞા યદિ સ્યુઃ
નો જાનન્ત્યુક્તિશક્તિં ત્રિચતુરપદધીલોલવાચો યદિ સ્યુઃ ।
દુર્વારાખર્વગર્વાઃ પરિભવચતુરાસ્સિદ્ધયો યદ્યલભ્યાઃ
નાત્મશ્લાઘાં સહન્તે ન તવ ફલલવસ્તદ્ભજ શ્રીનિવાસમ્ ॥ ૪૬॥

નો ગચ્છેઃ કવિતે સુતે ક્ષિતિપતિં ત્વં ચન્દનદ્રું ધને
ગન્ધે લોલતયા સસંશયબુધક્રૂરાહયસ્તત્ર હિ ।
અન્યોન્યૈક્યગલત્કુદૂષણવિષાઃ સાધ્વોષધિસ્પર્શતોઽપ્યેગ્રે
ત્વાં બત મારયેયુરચિરાત્ તત્ પત્રિપત્રં ભજ ॥ ૪૭॥

બોદ્ધારોઽપિ સમિદ્ધમત્સરતયા નાદ્ધાવહિત્થાચણાઃ
શુદ્ધોક્તિષ્વવિશુદ્ધબુદ્ધિજનનશ્રદ્ધાલુતાત્યુદ્ધતાઃ ।
મદ્ધીકાનપિ વિદ્ધયન્તિ કવિતે શ્રદ્ધત્સ્વ તેમેઽદ્ધાવચોઽ
બદ્ધક્ષ્મેશગુણા જગદ્ધવપદે નદ્ધા મમૃદ્ધા ભવ ॥ ૪૮॥

વિદ્વદ્વેષભૃતો મુધાપદગણાઃ પ્રોચ્ચૈસ્સ્વરા નિસ્ત્રપાઃ
સઙ્કેતેન પરસ્પરં સ્વવિજયે સાક્ષિત્વમપ્યાશ્રિતાઃ ।
સદ્બુદ્ધીનપિ વઞ્ચયન્તિ વિબુધાન્ ભૂપાન્તિકે નાસ્તિકા
વિદ્યાવિત્તવિઘાતુકા ભુવિ કૃતે લક્ષ્મીશમેવાશ્રય ॥ ૪૯॥

ગૌર્ગાં ગવા ગવે ગોર્ગોર્ગવિ ગૌર્યસ્ય પાતિ યઃ ।
વરાય પીડકાન્ વ્યાઘ્રાન્ દત્તે તં શ્રીનિધિં ભજ ॥ ૫૦॥

વૃષાચલેશિતુઃ પદાશ્રિતાઃ કુભૃન્મુદાઽઽપતત્-
ફલાદિવન્મહાફલાર્થિનોઽપ્યવાન્તરં ફલમ્ ।
અકાઙ્ક્ષિતામપિ શ્રિયં પ્રયાન્તિ શેષવૃત્તિસત્ફલા
પરેરિતાં મહીં પુરેવ તસ્ય પાદુકા ॥ ૫૧॥

આરાદ્વેગાદરિષ્ટં ભવતિ બહુતરં યત્પદાબ્જાનતાનાં
સવ્યૌ ભાગૌ યદીયૌ નિરવધિકરુચી ચારુભાભ્યાં ચ માભ્યામ્ ।
વિભ્રાજત્પુષ્પવદ્ભાપરિહસનચણે યત્કરામ્ભોજહેતી
શ્રીનાથઃ શ્રેયસી સોઽપ્રતિમબલભવાસઙ્ગ્યધીને કરોતિ ॥ ૫૨॥

વનચર રામ પુષ્ટવરગો દ્રુહિણાર્યતનો
વિરચિતસૂત્રવેદમયકાવ્યપુરાણતતે ।
પરખપયોધિજીવશુભદેશનિવાસરતે [પર] મયિ ચ

વસસ્યહો સકૃપ વત્સલ માધિપતે ॥ ૫૩॥

ઉદ્યત્સૂનસમીપભાક્ પરભૃતા દૃષ્ટે દ્વિતીયક્ષણ-
પ્રાપ્તામાર્દવમિદ્ધસૂનજયકૃદ્દન્તાવલીસઙ્ગિનઃ ।
લક્ષ્મ્યાસ્વાદ્યરસસ્ય નિત્યમૃદુતારુણ્યસ્ય ચાટીકતે
શેષાદ્રીશ તવાધરસ્ય કિમુ ભાસમ્પલ્લવં પલ્લવમ્ ॥ ૫૪॥

ગૌર્યસ્યામરવૈરિનાશનપટુસ્તત્કર્ણનાથાચલો
ધામૈતન્નિધિભાનુકુઞ્ચિદલયુગ્ગેહાવિહારાસ્પદમ્ ।
વત્સં તત્પદવૈરિહેતિકપટગ્રાહિચ્છિદાવર્ણિતઃ
કામસ્તચ્છતજિત્તનુસ્તદિતરા શ્રીઃ પાતુ દેવસ્સ નઃ ॥ ૫૫॥

કામો યસ્ય જગજ્જનિસ્થિતિલયવ્યગ્રસ્તનુસ્તચ્છતો-
ત્કૃષ્ટા શ્રીરિતરા તતો હિ હૃદયં તન્નિત્યયોગોજ્વલમ્ ।
ભોગસ્તત્પથદૂરવર્તિમહિમા તદ્ભદ્રરાડ્રિઃ પદં
નિત્યં ધામ તદેકનમ્રસુલભં તદ્ધાન્મુદે સોઽસ્તુ નઃ ॥ ૫૬॥

ત્વત્કૈઙ્કર્યાર્થદિવ્યામિતતનુજનનીં શ્રીશ શક્તિં ન કુર્વન્
વિત્તાશાં વર્ધયેશ્ચેત્સુચિરમનુસૃતૈર્નૈકદેશ્યૈર્ધનાઢ્યૈઃ ।
મત્પર્વણ્યેવ દત્તં કિમપિ પરિમિતં સામ્બુ કૃચ્છાદ્ગ્રહીતું
બહ્વીર્મે પાર્થિવીર્વા સપદિ દિશ તનૂર્વૈધહૈન્યેઽપિ માન્યાઃ ॥ ૫૭॥

નાગં પુષ્કરપુષ્કરહૃદગતં નક્રાસ્યરુદ્ધાઙ્ઘ્રિકં
ભ્રાજત્પુષ્કરપુષ્કરં સ્મૃતજગન્મૂલં ત્વરક્ષો જવાત્ ।
તં ત્વાં પુષ્કરપુષ્કરાયિતસમોત્કૃષ્ટં મણીન્દ્રપ્રભા-
સ્ફૂર્જત્પુષ્કર પુષ્કરપ્રભુમહાતલ્પાશ્રયે શ્રીનિધે ॥ ૫૮॥

દીનં માં કમલાસમાશ્રિત નતં ત્રાહીતિ વાચં મમ
શ્રુત્વા કિં ન કરોષિ સુન્દર શિરઃકમ્પં સમન્દાસ્મિતમ્ ।
મદ્દીનત્વતમશ્છટાપ્રતિભટસ્ફૂર્જત્કિરીટાગ્રણી-
પ્રત્યુપ્તોપલફાલફલ્યચપલામાલાસમુદ્ભાસિતમ્ ॥ ૫૯॥

ચિત્રં રમાધવ યશોમુક્તા રન્ધ્રોજ્ઝિતાસ્તવાનન્તૈઃ
પરિગુમ્ફિતા ગુણૌઘૈઃ સુદૃશાં હૃદયઙ્ગમા વિભાન્તિ ॥ ૬૦॥

અનર્ઘ્યફલદાયકે પ્રણતિમાત્રસાધ્યે ત્વયિ
સ્થિતેઽપિ ધનકાઙ્ક્ષયા ચિરમુપાસ્યમાનાર્થિનઃ ।

મદાન્ધતદુપેક્ષયા ધનલવં ચ નોપશ્યતો-
ઽપ્યહો તદુપસેવિની ભવતિ ધીર્મમ શ્રીનિધે ॥ ૬૧॥

સેચ્છં મામવિતું પદે તવ સુખે વિત્તે ચ દુઃખાત્મકે
ત્વં શાસ્ત્રેણ દૃગાદિના ચ સુગુણં દોષં ચ મે દર્શયન્ ।
જ્ઞાત્વાપ્યર્થિનિષેવિણે વિઘટયન્ લાભં પુનશ્ચાર્થભાક્-
કાઙ્ક્ષસ્યોદ્ધરણાભ્યુપાયમધિકં શ્રીભૃદ્વિભોપશ્યસિ ॥ ૬૨॥

શસ્ત્રક્ષારાગ્નિકર્માણ્યતિહિતમનસા સૂનવે ત્વં પિતેવાન્-
અન્ત્રે દુઃખાનિ કુર્વન્ નૃપસુતરચિતાકૃત્યદણ્ડાગુરૂણિ ।
દત્ત્વા હેતૂન્ ગતેરપ્યવસિ હિતતમં ત્વામુપેક્ષ્યોત્કટાઘ-
વ્યાપ્ત્યા દુઃખૈકભાજો વરકૃપ સુમતિં દેહિ મે શ્રીનિવાસ ॥ ૬૩॥

રૂપેણાલલિતેન મન્દવિભવૈરખૈરનન્યસ્થયા
વૃત્ત્યા ચાચલતા મયા સકમલ ત્વં સૂત્રધારો હરે ।
રમ્યપ્રાણિસુભૂમિકે બહુરસૈઃ પૂર્ણે જગન્નાટકે
ચિત્રં હાસ્યરસં કિરસ્યલઘુભિર્વેદ્યં હિ સામાજિકૈઃ ॥ ૬૪॥

ચિત્તાકર્ષિગુણં ભુજઙ્ગજયકૃદ્દોષં પ્રદાનસ્પૃહાદ્-
ઈનારિપ્રકારાગ્રનર્તિતસુગું ભક્તૈકસક્તાશયમ્ ।
ઉદ્વેલ્લત્કનકાચલાદરમિતં વૈકુણ્ઠગોષ્ઠ્યસ્પૃહાં
સર્વાશાનિલયાત્મકં નતનિધે ત્વત્તુલ્યમીક્ષસ્વ મામ્ ॥ ૬૫॥

શ્રીભૃત્પુણ્યજનાન્નિહન્તિ તવ ગૌસ્તાત્રેક્ષતે મે પુનઃ
ત્વં ચેજ્જિહ્મગભોગસઙ્ગતિરતોઽહં ચેત્તપસ્વી મહાન્ ।
અવ્યક્તારિદરોઽસિ વેદ્મિ ન પરં લોકં કુતસ્તદ્ભયં
ભેદે ત્વત્સદસન્મયાત્પરમસદ્રૂપસ્ય સામ્યં ક્રમે ॥ ૬૬॥

મદ્દોષવ્રજમાશ્રયવ્યયકરં લક્ષ્મીધર ત્વદ્ગુણ-
વ્રાતં લોકહિતે રતં ચ મનસા જાનન્ ભયાભીતિભાક્ ।
દાવવ્યાપ્તમુખદ્રુકોટરગતસ્વાભીષ્ટવાતાપતદ્-
વર્ષત્સન્નિહિતામ્બુભૃદ્વ્રણશુકન્યાયેન વર્તે હરે ॥ ૬૭॥

આચક્રામ જગન્તિ તે પદમિતિ સ્યાત્કિંવદન્તી મૃષા
નૈવં ચેન્મિતભાવૃણોતુ મમ હૃદ્ભૂયોઽપિ નૈવ ત્યજત્ ।
સ્થાલ્યન્ધઃકણનીતિતોઽર્થયુગથો નિશ્ચીયતે સા મયા
સર્વે શ્રીભૃદવેત્ય શક્તિમમિતાં ત્વામાશ્રયેયુસ્તતઃ ॥ ૬૮॥

કુલ્યાયાં સગરાત્મજૈઃ કરરુહૈરુત્પાદિતાયાં ક્વચિત્
 સેતું કિઞ્ચિદકારયો વનચરૈઃ પૂર્વં કિલૈતત્કિયત્ ।
ઉત્તારાય ભવામ્બુધેરપજને રત્નૈર્ગુણૈસ્તૈર્હરે
 સેતું મે પ્રતિપાદ્ય દર્શયસિ ચેચ્છક્તો વિનિર્ણાયસે ॥ ૬૯॥

અપ્રકૃતિબદ્ધમપિ સુપ્રત્યયમનવદ્યમપિ લસદ્દોષમ્ ।
કમલાપ્રિયમપિ કુપતિં ગિરિસ્થમપિ શ્રયે નિયન્તારમ્ ॥ ૭૦॥

સુરાસુરાર્યાઞ્ચિતપાર્શ્વરાકાવિલક્ષણેન્દૂપમિતં રમેશ ।
એકૈકમુક્તાફલકર્ણભૂષં મુખં મુહુસ્તે કુરુતે મુદં મે ॥ ૭૧॥

દુર્વારોગ્રમહાઘજાલયુગસૌ કિઞ્ચિત્ કથઞ્ચિત્ક્વચિત્
 કુર્યાચ્ચેચ્છરણાગતિં કથમમું રક્ષિષ્ય ઇત્યાત્તભીઃ ।
અભ્યસ્તં શરણાગતાવનવચઃ કૃત્વાઽભ્રચિત્રં ગિરૌ
 દુર્ગે શ્રીશ ફણીશભૃદ્દ્વિષભિષગ્વેષી નિગૂઢોઽસિ કિમ્ ॥ ૭૨॥

ગિરિચ્છલબિલેશયપ્રવરમૂર્ધનૈલ્યસ્ફુરન્-
 મણિર્નરપતન્મૃગક્રિમિદૃશાં ચ વીક્ષ્યસ્સદા ।
યદીક્ષિતનતસ્પૃહઃ કૃતવિલમ્બનો વર્તસે
 તદા ત્વનૃતમદ્ગિરા સમયભાક્ ત્વમેવાવ મામ્ ॥ ૭૩॥

ભીકરકાઞ્ચનલોચનઘૂકદિવાકરમભીરુમનેકમ્ ।
નાકપશોકવિમોક શ્રીકર સૂકરવિભો નૌમિ ત્વામ્ ॥ ૭૪॥

દુસ્ત્યજફલીકરણ સુશ્રીઃ કનકાદ્રિસ્થિતોઽપિ વિત્તાર્થી ।
પુરતો નિપતિતમશરણમનવથિકાર્તસ્વરં ત્યજ ન માં ત્વમ્ ॥ ૭૫॥

મા તે સ્તાદ્રુડદેયતાન્તસુમ મય્યર્થિત્વતસ્તજ્જગત્-
 સંસર્ગાન્નતુ મત્સ્વભાવજનિતં નાયાચથાઃ કિં બલિમ્ ।
વિત્તાર્થી કનકાદ્રિભાગસિ તતો યાચ્ઞાનિવૃત્ત્યુજ્ઝિતં
 લોકં માં નય વીતદેહિવચનઃ સ્યાં કિઙ્કરસ્તે સદા ॥ ૭૬॥

ભક્તૈસ્સ્વાર્થપરૈરકાર્યુપકૃતિઃ કા વેત્તિ તાન્ રક્ષસિ
 ત્વદ્વાત્સલ્યદયાક્ષમાદ્યુપચયવ્યગ્રં પરાર્થે રતમ્ ।
કસ્માન્નાવસિ મામઘૌઘનિરતં સ્વીયં પ્રભો શ્રીનિધે
 ઘણ્ટાકર્ણમુખાવનાદપિ યશો મદ્રક્ષણે સ્યાન્મહત્ ॥ ૭૭॥

શ્રીનાથ સ્વાપહારાન્મયિ તવ રુડભૂદ્દણ્ડયસ્યેતમસ્માત્ માં
ત્વત્ક્રૂરપ્રકૃત્યા સ્વવિભવપરયા પ્રેરિતા ધીર્મમેત્થમ્ ।
ચક્રે નાહં તદેનાં નિગલય તુ પદે સ્વં હૃતં તે ગૃહાણ ત્વં
દૂરે મે કુરુષ્વ પ્રકૃતિમપિ પુનર્નાપહારઃ પ્રસીદ ॥ ૭૮॥

રત્નૈરિતરાપ્રમેયપટુતૈસ્ત્રાસાદિદોષોજ્ઝિતૈઃ શુદ્ધૈઃ
કાઞ્ચનભૂષણાલિમમિતામુદ્ભાસયદ્ભિઃ પરમ્ ।
ત્વત્સાયુજ્યમુપાગતૈસ્તવ વપુર્હારૈર્જરીજૃમ્ભ્યતે
વિષ્ણો ત્વત્પદમપ્રમેયમહિમ શ્રીનાથ સદ્ભિર્યથા ॥ ૭૯॥

સઙ્ખ્યાવદ્ભિરપિ વ્યપેતગણનૈર્ગન્ધોજ્ઝિતૈરપ્યલં
સામોદૈર્વિગતોગ્રતૈરપિ મનસ્સમ્ભૂતધિક્કારિભિઃ ।
શેષાદ્રીડસદૃગ્બલૈરપિ સદા ત્વદ્દર્શનપ્રોજ્જ્વલૈઃ
સદ્ભિસ્સેવિતમાદરાત્તવ કદા પશ્યેમ પાદદ્વયમ્ ॥ ૮૦॥

હરિણા રિપુકરિણામુરુકરુણાવિતકરિણા
શરણાગતિકરણામરતરુણાઽઽદિમગુરુણા ।
દરિણાઽમ્બુજશરણાશરદરુણામ્બુજહરિણા
હરિણા કૃતભરણા વયમરુણાલિજિદરિણા ॥ ૮૧॥

તુલ્યોત્કૃષ્ટબિવર્જિતો યદિ ગુણૈસ્ત્વં ચેત્તણૈઃ સ્વં તે ત
દન્યૈરહં તાદૃઝ્માનતમા ત્રયી યદિ તતઃ શુદ્ધસ્ય મત્સઙ્ગતઃ ।
નાવદ્યં તવ કિં ભવેદિતિ પુરા દૃષ્ટં ન ચેન્માદૃશાઃ
કિં દૃષ્ટઃ ક્વચનાપિ તત્કુરુ ભવચ્છુધ્યૈ વિદોષં તુ મામ્ ॥ ૮૨॥

વૈકુણ્ઠે પરતૈવ વૈભવવતી સૌશીલ્યમુખ્યાસ્ત્વહ-
ર્દીપાસ્તદ્વૃષશૈલભાઙ્નરમૃગવ્યોમાઙ્દ્રુમાદ્યૈરપિ ।
સેવ્યોઽસ્યદ્ય બહુક્ષુધસ્તવ ચિરાદેતે ગુણાઃ પ્રસ્ફુરદ્-
દર્વારામિતપાપરાશિમમિતં સમ્પ્રાપ્ય તુષ્યન્તુ મે ॥ ૮૩॥

પદદર્શકોરુયોજિતહસ્તાભ્યાં નિજપદાબ્જનમ્રાણામ્ ।
ભવજલધિરૂરુદઘ્નઃ સ્યાદિતિ સૂચયસિ નનુ વૃષાદ્રીશ ॥ ૮૪॥

ચઞ્ચદ્દારમરીચિકાવિષયદુર્વીરુદ્ધદવ્યાઘ્રયુક્-
ક્રુડ્દાવાવૃતિભીમસંસૃતિવનીદગ્ધાત્મસંજીવનીમ્ ।
સારાસારભવત્કથારસસુધાં પીતાં સદા કુર્વતાં
શેષાદ્રીશ સુધા સુધાઽબ્ધિજનિતા સા શર્કરા શર્કરા ॥ ૮૫॥

કાન્ત ત્વન્મતિકાન્તિશાન્તિકરણપ્રકાન્તવિક્રાન્ત્યસદ્-
ભ્રાન્તિધ્વાન્તદુરન્તદુષ્પથગતિશ્રાન્તિપ્રતાન્તાન્તરમ્ ।
શાન્તસ્વાન્તકૃતાચ્છચિન્તનસુધાસિક્તત્વદઙ્ઘ્રિદ્વયાઃ
સન્તો માં વિનિવેશયન્તુ સદમનસિ સ્વીયે કટાક્ષેણ તે ॥ ૮૬॥

પાઠાન્તરમ્ – એનઃકૃન્તનસન્તતોલ્બણભવદ્વૃત્તાન્તચિન્તાસુધા-
સન્તુષ્યન્તમિમં કુરુ શ્રિતનિધે શ્રકાન્ત ચિન્તાપહ ॥ ૮૬॥

કિં ચામરાણિ ધવલાતપવારણાનિ સિંહાસનાનિ શયનાનિ પદાસનાનિ ।
પીતામ્બરાણિ યદિ વાઽત્ર યથોચિતં તે
સર્વોપચારકરણાનિ વૃષાચલેશ ॥ ૮૭॥

સિદ્ધાન્તાર્થવિરુદ્ધબદ્ધકુહનાબૌદ્ધપ્રબન્ધચ્છટા-
શ્રદ્ધાસિદ્ધદુરધ્વબાધિતભવન્નિર્ધારણાધારણમ્ ।
મા ત્વં મા કુરુ માસમાશ્રિત સુધામાધુર્યમાધુર્યવાગ્-
ગુમ્ભે ત્વદ્ગુણયુક્પ્રબન્ધનિકરે સમ્બન્ધયાસ્મન્મનઃ ॥ ૮૮॥

વક્ષો દક્ષિણમીક્ષ્યતેઽક્ષતતટિલ્લક્ષ્મ્યા હિ લક્ષ્મ્યા જગદ્-
રક્ષાદક્ષકટાક્ષયાઽક્ષયભવત્સ્વાતન્ત્ર્યહૃદ્દીક્ષયા ।
માત્રા મે સતતાશ્રિતં તવ તતો મા ત્રાસમાત્રાઽસકૃદ્-
ગાઢપ્રેમકૃતાગસોઽપ્યતિશિશોઃ ક્ષાન્ત્યેકરક્ષ્યસ્ય મે ॥ ૮૯॥

અભ્રામ્ભોજસુખસ્સદૈવ નિરયવ્રાતે સ્વતન્ત્રશ્ચરન્
પ્રાપ્તં મદ્ગ્રહણેચ્છયા સ્થિરસુખં ત્વાં મત્પૂરે દુઃખિતમ્ ।
રુદ્ધં ચાકરવં પરાસ્તિ યતિ તે શક્તિર્હરે ત્વત્પુરે
નોભૂયશ્ચ્યુતિદે નિધેહિ સુખદે માં શ્રીનિધે સન્નિધે ॥ ૯૦॥

રક્ષતુ લક્ષ્મીશો માં રક્ષિતરક્ષોઽનુજાદિહિતપક્ષઃ ।
કુક્ષિસુનિક્ષિપ્તજગલ્લક્ષ્મણમુનિદત્તલક્ષ્મસલ્લક્ષ્યઃ ॥ ૯૧॥

શબ્દાદિદુર્વિષયતાપકયુગ્ભવેઽસ્મિન્ ઘોરજ્વલજ્જ્વલનતપ્ત ઇવામ્બરીષે ।
વ્રીહિ પુરાણમપયઃ પટુતોજ્ઝિતં માં કાલં
કિયન્તમભિભર્ત્જયસે રમેશ ॥ ૯૨॥

કેચિત્પુણ્યદિનેષ્વનલ્પયતના જિહ્વાગ્રમાત્રે ક્ષણં
સ્વાદ્વલ્પં ગદકૃચ્ચ વસ્તુ સમુદો યદ્ભુઞ્જતે તત્કિયત્ ।

પૂર્ણા સર્વરસૈઃ સમસ્તગદભિન્નિર્યત્નલભ્યામિતા
   લક્ષ્મીનાથકથાસમુજ્જ્વલસુધા સ્વાદ્યાસ્તુ મે સર્વદા ॥ ૯૩॥

સૌમ્યામેકકલાં શુચિં ચ દધતઃ સર્વજ્ઞશબ્દં ગુડ-
   ક્ષ્માભૃચ્છબ્દમિવાવમત્ય નિપુણો યત્સેવયા પ્રાપ્તવાન્ ।
નિર્દોષાઃ સકલાઃ કલાઃ શ્રયતિ તં શબ્દં યથાર્થં નમચ્-
   છીર્ષાલઙ્કૃતિપાદુકોઽસ્તુ સતતં દેવસ્તુરઙ્ગાનનઃ ॥ ૯૪॥

યત્પાદામૃતમાદરાચ્છિરસિ યન્નામામૃતં ચાનને
   બિભ્રત્પ્રાપ શિવત્વમિન્દુમકુટઃ સર્વજ્ઞતાં ચોજ્જ્વલામ્ ।
ધાતા સોમકનીતવેદનિકરઃ સમ્પ્રાપ યસ્માત્ત્રયીં
   તં શુભ્રાંશુવિશુદ્ધવાહવદનં શ્રીવેઙ્કટેશં ભજે ॥ ૯૫॥

પૂતાસ્ત્વદ્વચનાનનાઃ ક્ષિતિરુહઃ શેષાદ્રિશીર્ષસ્થિતાન્
   આરુહ્ય ક્રતવે તવોડુ સુમનોબુદ્ધ્યાઽપચિન્વન્ત્યહો ।
તદ્બુદ્ધ્યા મુહુરુત્સૃજન્તિ કુસુમાન્યુચ્ચૈસ્ત્વરાશાલિનઃ
   પ્રત્યૂપેઽદ્ય ભજ પ્રબોધમમલસ્ફૂર્તે રમાવલ્લભ ॥ ૯૬॥

સત્તેજાંસિ સુમાનિ નન્દનવનાદાનીય દેવાધિપૈઃ
   ત્વત્પાદદ્વિતયેઽર્પિતાનિ સુધિયાં કુર્વન્ત લક્ષ્મીપતે ।
ત્વત્પૂજાપરતુઙ્ગવેઙ્કટશિરોરૂઢદ્રુમાગ્રશ્રિત-
   પ્રભ્રાજત્સુમબુદ્ધિભાગપચિતાનીતાર્પિતોડુભ્રમમ્ ॥ ૯૭॥

ત્વત્સમ્પ્રાપ્તવિભૂતિરક્ષણભરઃ કારુણ્યપૂર્ણો યતિ-
   ક્ષ્માભૃત્ત્વત્પદયોઃ પ્રપત્તિમકરોત્સ્વીયાર્થમપ્યાદરાત્ ।
ઇત્થં તદ્વચને ચ દર્શિતમભૂદાર્યૈસ્તતો મામચિત્-
   કલ્પં વાઽપ્યવ વેઙ્કટાદ્રિધવ તત્સમ્બન્ધતઃ શ્રીનિધે ॥ ૯૮॥

દૈન્યોક્તિર્મમ સપ્તપાદવિનતિર્જાતા તવાગ્રે કુતઃ
   કારુણ્યામ્બુનિધે રમેશ વિદિતં નો પૂર્ણકામાન્તિકે ।
સ્વાન્તં તન્નવનીતકોમલતમં હેતુર્વિધોરાત્મભૂ-
   વહ્નિપ્રોજ્જ્વલગોપિકાકુચતટીલગ્નં વિલીનં ક્ષણાત્ ॥ ૯૯॥

ફુલ્લાક્ષિદ્વિતયેન તે મયિ કથાઃ શ્ૃણ્વત્યમર્યાદતાં
   શ્રુત્યાદીનિ દૃશોર્વિલોક્ય કરણાન્યલ્પેતરાંસ્ત્વદ્ગુણાન્ ।
શબ્દાદીનવિભાગતોઽનુભવિતું વાઞ્છન્તિ શક્તસ્સમઃ
   ત્વં ચૈવં કુરુ માપતે વિભજનં સ્તોકેઽપિ દાયેઽયુધિ ॥ ૧૦૦॥

ભૂભૃદ્ભિદ્ધ્વજમાલ્યસ્ફુરદમરરિપુસ્વામિવક્ષોભિદસ્તે
રેખામાત્રેણ નમ્રાઃ સ્મરયુધિ નખરા યેષુ સમ્પીડનોત્કાઃ ।
ગોપીવક્ષોજશૈલેષ્વસકૃદકરુણોદ્ઘટ્ટનૈસ્તૈઃ કિણત્વં
પ્રાપ્તં ગચ્છેન્મૃદુત્વં હૃદયમિહ કથં શ્રીશ મય્યાકુલેઽપિ ॥ ૧૦૧॥

લઙ્કાયાં પ્રાપ્ય બન્દીં સ્વયમમરવધૂર્વીતબન્દીર્વ્યધાઃ શ્રીઃ
આર્દ્રાગોરાક્ષસીશ્ચ પ્લવગવરભયાદધ્યરક્ષઃ કૃપાર્તા ।
વન્દીક્ષે કર્મબન્દીવિકલમનુકલં સાગસં વા ત્વદઙ્ઘ્રયો
લગ્નં કસ્માન્ન પાસિ ખવશવૃષધરે ઽમ્બ માં વત્સલાઽપિ ॥ ૧૦૨॥

ખદ્યોતભાવં ભવદીયતેજઃ પ્રદ્યોતનાગ્રે તપનસ્સમેત્ય ।
ખદ્યોતનામ પ્રયયૌ ત્રિલોકીવિદ્યોતમાનપ્રથ વેઙ્કટેશ ॥ ૧૦૩॥

સત્સઙ્ઘાતમહોસહે કુવલયપ્રદ્વેષિવૃત્ત્યઞ્ચિતે
નિત્યં પઙ્કજનીષ્ટકારિણિ કદાચિત્ પ્રાપ્ય વા દક્ષિણામ્ ।
ભૂયોઽપ્યુત્તરયાશયા પ્રચલિતે પ્રાયો વિસર્પત્કરે
સર્વત્રૈવ કઠોરગૌ ભયિ કથં લક્ષ્મીશ નો તિષ્ઠસિ ॥ ૧૦૪॥

વૈકુણ્ઠાદવતીર્ય ચૌર્યનિયતં જારત્વમભ્યસ્તવાન્
શ્રીશ ત્વં નવનીતગોપવનિતાઃ સ્તોયાનુષક્તીઃ શ્રયન્ ।
શબ્દાદૌ વિષયે ચિરાન્મમ રુચિં પાતિવ્રતીં બિભ્રતીં
હૃત્વોત્કાં ત્વયિ ચેત્પરે તુ પુરુષે કુર્યાઃ કૃતી સ્યાસ્તદા ॥ ૧૦૫॥

શેષાદ્રૌ કુસુમં ભવેયમપિ તદ્યત્સ્વલ્પમેકં ફલં
નશ્યદ્વાગ્દ્રુમસઙ્ગતં ન જનયલ્લૂનં કરેણાદરાત્ ।
ત્વદ્ભક્તાય ફલાન્યદૃષ્ટવિલયાન્યચ્છાન્યનેકાન્યલં
સૂતે ત્વત્પદગન્ધકાન્તિમૃદુતાશ્ચાપ્નોતિ સાર્થોદયમ્ ॥ ૧૦૬॥

જેતું ત્વાં સજડાન્તરસ્સનિનદો મેઘો વૃષાદ્રિં ગતો
નિત્યશ્રીયુત સાચિરદ્યુતિરિલાં કુર્વન્ સપઙ્કાં સ્વતઃ ।
પઙ્કધ્વંસક શુદ્ધસેવિત શુચિત્યક્તો નભોગસ્સુખિન્
લજ્જાભાગશનીદ્ધતાપવિકરો મુઞ્ચત્યહો જીવનમ્ ॥ ૧૦૭॥

સમીરણસમીરણશ્રિતસુધન્યવન્યસ્ફુરત્-
સુમપ્રકરતત્પરભ્રમરમણ્ડલીવેષ્ટિતમ્ ।
હિમાહિમભયાદિવાધવલગાઢવસ્ત્રાવૃતં

વિમાનમુપમાનવાગ્રહિતમાશ્રિતં ત્વાશ્રયે ॥ ૧૦૮॥

પ્રયાતિ મુખતાં વિધૌ તવ કલઙ્કહાનેચ્છયા
ભજાલમભિજિઘ્રુતં પ્રિયવિયોગદુઃખાસહમ્ ।
ચતુર્યુગલમૌક્તિકશ્રવણભૂષણત્વં તથા
નખપ્રતતિતામપિ સ્વયમગાદ્રમાવલ્લભ ॥ ૧૦૯॥

મદ્રક્ષૈકકૃતક્ષણેન ભવતા દત્તેન ચિત્તાદિના
સેવાયૈ કરણેન સાધુ ગુરુણા ગોવાલસંછેદનમ્ ।
છિત્ત્યૈ શિષ્ય ઇવૈધસઃ કુચરિતં કુર્વેઽતિદુર્વારધીઃ
મામીદૃગ્ગુણમીશ રક્ષસિ કથં શેષાચલાધીશ્વર ॥ ૧૧૦॥

શાટીભાસ્વત્કટીત્વિટ્ફણિપતિફણિતિં ચારુટીકાસુકુઞ્ચીં
યુષ્મત્સર્વસ્વપેટીં રુચિરવિરચિતાં શુદ્ધગોરાશિરત્નૈઃ ।
વિત્તાશાયત્તચિત્તે મયિ વરદયયા સન્નિધે ત્વં નિધેહિ
ત્વદ્વશ્યોઽવશ્યતઃસ્યાં તદનુ તવ પદં ન ત્યજેયં ભજેયમ્ ॥ ૧૧૧॥

પ્રયાતિ મુખતાં વિધૌ તવ કલઙ્કહાનેચ્છયા
પ્રિયાવિરહગૂઢધીર્ભવદુરઃસ્થિતાયા ગલમ્ ।
નનાન્દુરિવ રાગતોઽશ્લિષદનર્ઘ્યભાસોજ્જ્વલા
વૃષક્ષિતિભૃદીશ્વરાસિતકિરીટ તારાવલિઃ ॥ ૧૧૨॥

આખેટોત્કં વૃષાદ્રિપ્રભુમતિજવન શ્રીશમાનીય દેવં
ચારચ્ચારં પુરો મે વિસદૃગુપકૃતે ક્રીતદાસત્વમાપ્તમ્ ।
માં ત્વત્પાદેઽભિરાજદ્ગુણગણ વિનતં વીશ્વરાનન્દયિત્વા
કર્માજન્યાભવસ્પૃગ્વર ભજ વિનતાનન્દનાખ્યાં શુભાર્થામ્ ॥ ૧૧૩॥

કાંશ્ચિદ્રક્ષસિ માં કુતો ન કમલેણ્ણિર્હેતુકારુણ્યભાક્
સેચ્છાસ્તે યદિ માં તથા ન કુરુપે કસ્માન્ન યાદૃચ્છિકમ્ ।
પુણ્યં મે યદિ તત્કુતો ન તનુષે ચિત્કૃત્યમેતત્તુ ચેત્
અન્તઃ કિં કુરુપે હ્યુદાસ્સ ઇહ ચેચ્છક્તઃ સમો વા ન કિમ્ ॥ ૧૧૪॥

અગ્રે તેઽપિ વિવાદતત્પરમમું કિં પાતયસ્યુગ્રરુટ્
દુઃખે ત્વત્પુર આકુત્ર પુરાસ્થિતોઽસ્મિ સહજં ભૂયોઽસ્તુ કા મે ક્ષતિઃ ।
કુર્વે સાધુ વિવાદમેવ યદિ વા નિત્યે પદે ચૈધવત્
ઘણ્ટાકર્ણવદપ્યયે ક્ષિપસિ ચેત્સ્યાઃ સાર્થકોપસ્તદા ॥ ૧૧૫॥

આરાન્મઙ્ગલતુઙ્ગશૃઙ્ગશશભૃદ્ગ્રાવસ્રવદ્વાર્નિશા-
સિદ્ધાસેકમહાલવાલતરુજૈર્નાનાસ્ફુરત્સૌરભૈઃ ।
વિભ્રાજન્મકરન્દકૈઃ સુમરુતા વિક્ષિપ્યમાણૈઃ સુમૈઃ
આક્રાન્તાલયમિન્દિરાસહચરં વન્દે મહાનન્દદમ્ ॥ ૧૧૬॥

તિષ્ઠન્ વેઙ્કટશૈલમૂર્ધ્નિ પુરતઃ કૃત્વા પતઙ્ગં શુચિ-
સ્તોમેન સ્ફુરતાઽઽવૃતો નનુ ધરન્ સવ્યે પવિત્રં કરે
વારસ્ત્રીજનનૃત્તવીક્ષણમપિ ત્યક્ત્વાઽદ્વિતીયો હરે
ગોપીજારતયા સમાગતમઘં માર્ષ્ટું તપસ્તપ્યસે ॥ ૧૧૭॥

શબ્દાદિપ્રવણાંસ્ત્વદઙ્ઘ્રિજલજાત્ દ્વન્દ્વં તૃણીકુર્વતઃ
પશ્યન્તો મનુજાન્ વિસૃષ્ટવિષયાઃસન્તોઽપિ લક્ષ્મીપતે ।
પ્રાપ્યપ્રાપકશોધકાઃ પરિહૃતૌ ભક્તેરપિ પ્રોત્સુકાઃ
તત્ત્વત્પદ્યુગસદ્ધનં તૃણમિવ પ્રેક્ષન્ત ઇત્યદ્ભુતમ્ ॥ ૧૧૮॥

શેષાદ્રીશ્વર મામકં દૃઢપદં બહ્વર્થસન્ધાયકં
ગોજાલં વ્રજવાસિનામિવ ભવદ્ગીતામૃતાસારતઃ ।
વ્યાવર્ત્યામિતદુષ્ટસત્ત્વવિષયાત્ ત્વત્સન્નિધૌ ચારયન્
રક્ષ ક્ષેમદ કિઞ્ચિદાન્તરધનં ગોપાલક સ્વીકુરુ ॥ ૧૧૯॥

આર્યાનાર્યાશયામ્ભોભવભવનશિરશ્છેદપાપોગ્રતાપ-
વ્યગ્રસ્યોગ્રસ્ય ભિક્ષાં પ્રતિદિશમટતઃ પાણિલગ્નં કપાલમ્ ।
ભ્રાજત્તેજા વ્યધાસ્ત્વં સ્ફુટિતમજ યદા પાર્શ્વરક્તપ્રસૃત્યા
પારમ્યં રમ્ય સમ્યક્તવ જગદવદત્સત્તદૈવાદિદેવ ॥ ૧૨૦॥

ત્ર્યક્ષં રક્ષકમાહવે વિવશયન્ રક્ષ્યસ્ય બાણસ્ય ચ
ત્વત્પૌત્રાય નિજાત્મજાં કલયિતું દ્વૌ દ્વૌ સમાશ્લિષ્ય ચ ।
સ્વેશં ક્રન્દિતુમાત્મનોર્નનુ દશાં ત્યક્ત્વાઽવશિષ્ટાન્ ભુજાન્
છિત્વા રક્ષકતાં ત્વદેકનિલયાં લક્ષ્મીનિવાસાકરોઃ ॥ ૧૨૧॥

ન જાને શ્રીજાને હિતમહિતમપ્યાહિતમહા-
વિમોહો મોહોદ્યદ્વિષમવિષયાસક્તિવિવશઃ ।
નિહન્તાઽહન્તાયા ભવતિ ન વિવેકો ભવતિ ધીઃ
ખપદ્મં પદ્માઙ્ઘ્રી કથમિવ લભેયં સમગુણ ॥ ૧૨૨॥

કદા વા શેષાદ્રૌ તુલિતવિરજસ્વામિસરસી-
જલે સ્નાતઃ પૂતો ભુવનભવન ત્વદ્ભવનભાક્ ।

અયે લક્ષ્મીનાથાસુરવિમથનાસ્મદ્ધનનિધે
પ્રસીદેતિ ક્રોશન્નિમિષમિવ નેષ્યામિ દિવસાન્ ॥ ૧૨૩॥

કદા વા પઙ્કચ્છિજ્જનયદમૃતં નિર્મલનખ-
શ્રીયા પઙ્કોત્પન્નં વિષનિલયમબ્જં હસદિહ ।
ન તે રાગં સ્વીયં પ્રકટયદિવાલોહિતતયા
રમેશ ત્વત્પાદદ્વિતયમજ પશ્યેયમસકૃત્ ॥ ૧૨૪॥

કદા વા દાવાર્ચિઃપરિભવભવદ્ભૈભવભવ-
ચ્છિદમ્ભોભૃદ્મ્ભોલ્લસનહસનપ્રોજ્જ્વલતનો ।
સુસારાસારાભાશરણકરુણાદૃષ્ટિરમિતા
પ્રસન્નાઽઽસન્નાર્તા મયિ પરિપતેદ્વેઙ્કટપતે ॥ ૧૨૫॥

ધારકપોષકભોગ્યત્વતઃ પરમો ગુરુર્દયાલુર્નઃ
અસ્મભ્યં ત્વયિ રચિતન્યાસોઽયં તત્ સુમાવ સમ્બન્ધાત્ ॥ ૧૨૬॥

અનેકૈઃ સ્વૈ રૂપૈર્ધરતિ મમ રૂપાણ્યનુદિનં
શ્રમો ભૂયાનાસીદિતિ ફણિપતેસ્તાનિ કૃપયા ।
દધન્તીં શ્રીભર્તર્નિજપૃથુકલક્ષ્મીમનુપમાં
શિરોબાહામધ્યે વહસિ કિમુ શેષત્વકુતુકી ॥ ૧૨૭॥

સુગન્ધપરિબન્ધુરં સવિધસેવિનાં સામ્યદં
લસદ્વિટપસદ્ભુજં કિસલયાભદન્તચ્છદમ્ ।
અદભ્રમલયં ગિરિં શ્રિતમમેયલક્ષ્મ્યાઞ્ચિતં
ભવન્તમભજન્ત કિં પટુપટીરબુધ્યોરગાઃ ॥ ૧૨૮॥

ત્વાં વલ્મીકગતં પુરાઽતિસુરભે સંવેષ્ટયન્તઃ ફણિ-
શ્રેષ્ટાઃ શીર્ષભુજાવલગ્નનિલયા ગન્ધૈકવશ્યાન્તરાઃ ।
ગોક્ષીરચ્યુતવામલૂરુકભયપ્રત્યક્તવન્તદ્ભ્યઃ પરે
ભાન્તીમે કિમુ વેઙ્કટાચલપતે શ્રીવાસબાહ્વન્તરમ્ ॥ ૧૨૯॥

નિર્હેત્વપ્રતિષેધમાદૃગવનં હર્યાખુવૈર્યર્ભક-
ન્યાયાભ્યાં ન ભવત્યથાપિ શકનાદ્બુદ્ધ્વા નિપેધ્દ્રેઽપિ મે ।
ષટ્પત્કીટનયેન દેહિ સમતાં કઃ કિં સ્વતન્ત્રં વદેત્
મર્યાદા ક્વચિદુજ્ઝિતા જયતુ વા નિત્યા વિભૂતિઃ પરમ્ ॥ ૧૩૦॥

મન્નિન્દાસ્પૃહયાલુતાળુરિહ નિર્બીજં કૃપાલુર્ભયા

ગુપ્તં વાઙ્મનસાપદં ચ મદઘવ્રાતં સ્વયં કીર્તયન્ ।
આદત્તે સમુદગ્રમુત્તવ ચ મત્પાપાપનુત્તિશ્રમં
કે કિઞ્ચિત્ કુઞ્ચયતિ પ્રપઞ્ચજનનોદઞ્ચદ્વિરિઞ્ચેડિત ॥ ૧૩૧॥

રક્તા દૃક્ સ્વગુણેન તે હૃદકરોદ્રક્તં શ્રિયઃ સઙ્ગતેઃ
ત્વદ્દૃઙ્નીલતમા તુ રક્તભકરોત્ હૃત્તે વિચિત્રં ત્વિદમ્ ।
સ્વાતન્ત્ર્યં ગુણમગ્રહીત્તવ દદૌ સ્વં પારતન્ત્ર્યં ચ તે
ભાગ્યં મે પિતરેતદત્યઘયુજો માતા ત્વલં વત્સલા ॥ ૧૩૨॥

રમ્યસ્યન્દમરન્દબિન્દુસુમનોવૃન્દત્વદઙ્ઘ્ર્યમ્બુજ-
દ્વન્દ્વાસ્કન્દનનન્દનીયવિભવાઃ કુન્દેન્દુમન્દસ્મિત ।
વન્દારુવ્રજચન્દિરાનન સુધાનન્દાશ્રુસન્દોહિનઃ
સુસ્પન્દાઃ પવનાઃ ત્વદઘ્રુપવનાદ્ભૂપાવનાઃ વાન્ત્વિતિ ॥ ૧૩૩॥

જીવાઃ પાત્રાણિ માયા વિપુલયવનિકા સૂત્રજાલાનિ કર્મ-
વ્રાતા માયાવિકારા હ્યુપકરણપદં યાન્તિ પેટ્યૌ પટિષ્ઠે ।
શ્રીવત્સઃ કૌસ્તુભશ્ચાપ્રકૃતિપરવશા વીક્ષણોત્કા નટી શ્રીઃ
લીલાદીન્ સૂત્રધારઃ ત્વમખિલભુવનં નાટકસ્તે રમેશ ॥ ૧૩૪॥

સમમસમમનન્તં મઙ્ગલં મઙ્ગલાનામ્
અમલમમલભાસા ભાસયન્તં જગન્તિ ।
હૃદયહૃદયમુષ્ણદ્યોતહૃષ્યન્નશુષ્ય-
ત્કમલકમલનેત્રં સ્તોત્રપાત્રં કરોમિ ॥ ૧૩૫॥

પ્રીતઃ શ્રીશ વપુઃશ્રમેણ સુમદે ભૂરઙ્ગદાસે ધન-
ચ્યુત્યા પ્રીતતરઃ સુવર્ણસુમુદે તોણ્ડપ્રભૌ નિર્વ્યયે ।
નાથ પ્રીતતમઃ કુલાલજરઠે મૃત્સૂનદે તત્સુમે
પ્રીતિસ્તે સુલભે મમાદ્ય સુલભં હૃત્પદ્મમઙ્ગીકુરુ ॥ ૧૩૬॥

નાયં શીતકરો જગત્સુ વિહરત્ત્વત્કીર્તિલક્ષ્મ્યાઃ કરે
શ્વેતાબ્જં ન ચ લક્ષ્મ બમ્ભરકુલં નો કૌમુદી તારકાઃ
શીતત્વિટ્પટવાસજાતિકુસુમવ્રાતાઃ સુરસ્ત્રીકર-
ક્ષિપ્તાસ્તત્તનુસઙ્ગતાસ્તદનિશં તે હિ ભ્રમન્ત્યમ્બરે ॥ ૧૩૭॥

રૂપિ સ્વં ગુણમાદધાતિ નિકટે સ્વચ્છેઽન્યરૂપાસ્પદે
દૃષ્ટાન્તસ્ફટિકે જપાસુમમિહ પ્રાપ્તં વિચિત્રં મહત્ ।
શ્યામોઽપ્યાત્મગુણેન કામમતનોઃ શ્યામાઃ પુરા ગોપિકાઃ

રક્તા નન્દતપોવિપાકજનને શેષાચલાધીશ્વર ॥ ૧૩૮॥

બ્રહ્માણ્ડે સરસિ સ્ફુટોડુકુમુદે દ્યુર્વારિ તે મેરુણા
ક્રીડામણ્ડપિનીનચન્દિરમિપેણૌજોયશસ્સમ્પદૌ ।
પશ્યન્તીષ્વમરીષ્વપક્ષ્મચલનાસ્વારાદ્વિસર્પત્કરે
સાન્યોન્યગ્રહણસ્પૃહે ભ્રમમિતઃ શેષાદ્રિચૂડામણે ॥ ૧૩૮॥

નેત્રારુણ્યમિષેણ વેङ્કટપતે યુષ્મત્સ્વરૂપાદિકે
સત્ત્વાસત્ત્વદૃશોરુપર્યનુસૃચલિતસ્વોદ્દેશ્યભેદં પરમ્ ।
ભૂષાસ્ત્રત્વયુતત્વદાયુધસમં પ્રહ્લાદદૈત્યેન્દ્રયોઃ
સન્દૃષ્ટં યુગપત્પ્રદર્શયસિ કિં સદ્રાગરુટ્ત્વં પદમ્ ॥ ૧૩૯॥

રમાડરુણપયોરુહપ્રતિમયત્કરૈર્લોહિતા
ત્વમપ્યધવલોત્પલપ્રભવદીક્ષણપ્રેક્ષણૈઃ ।
ગતોડસ્યસિતતાં ધ્રુવં તવ તદક્ષિયુગ્મં સદા
મયિ પ્રસરતુ પ્રભો વૃષધરાધ્રધારાધર ॥ ૧૪૦॥

દાતૃત્વોપકૃતિપ્રિયોક્તિરહિતાન્નોધદ્યાન્ પ્રાભવ-
સ્ફીતાન્ દર્શિતદન્તપઙ્ક્તિ ધનિનઃ સંસેવ્યમાનાન્મયા ।
મન્યે હૃદ્યુપકારકાન્ ધનલવાલાભાકુલં માં યતઃ
તે શ્રીવેङ્કટશૈલનાથ સદયં ત્વાં સ્મારયન્ત્યઞ્જસા ॥ ૧૪૨॥

ઉષ્ણાનુષ્ણસહિષ્ણુરેવ વિચરન્નુષ્ણાંશુતેજશ્ચયં
ભૂષ્ણું જિષ્ણુમજં ચ વિષ્ણુમસુખં મુષ્ણન્તમર્થિસ્થિતમ્ ।
રૈતૃષ્ણામૃગતૃષ્ણયા પરવશો દુષ્ટાધ્વનિષ્ણાતધીઃ
શ્રીશં કૃષ્ણરુચિં વિહાય નરમાઃ સ્તૌમ્યેષ પુષ્ણાત્વિતિ ॥ ૧૪૩॥

વૃત્તિર્મે ન સતીતિ ચેત્તવ કુતઃ સર્વાન્નભુક્ સા સતી
ભિલ્લીશેષફલાદ જારનૃપતે દસ્યોડઙ્ગનાધ્વંસક ।
સૂતે પાપમસૌ મમૈવ યદિ તત્કિં નિગ્રહસ્તે યદિ
ત્વદ્વદ્વીક્ષ્ય તદુજ્ઝિતઃ શિશુમિમં શ્રીશાવ ભાં તાવકમ્ ॥ ૧૪૪॥

સ્વાતન્ત્ર્યપ્રબલાઘવીક્ષણભિયા ત્વજ્જીવયોર્વત્સલા
શ્રીરાસ્તે રુચિરોરસિ પ્રતિકલં સ્વાતન્ત્ર્યભઙ્ગાત્તતઃ ।
વાત્સલ્યાદિગુણા જયન્તિ શરણં ત્વં ભીર્ન ન ક્લિષ્ટતા
સૌખ્યં તૂલ્કટમિત્થમપ્યરુચયો ન ત્વાં ભજન્તે જડાઃ ॥ ૧૪૫॥

ચોરઃ કોઽપિ વૃષાચલે બત મહામાયો જરીજૃમ્ભતે
આરાધ્યપ્રજવપ્રસારિતગુણાકૃષ્ટાઃ પ્રમોદાઞ્ચિતાઃ ।
તત્સાત્કૃત્ય સમગ્રવઞ્ચિતધિપઃ સ્વં સર્વમન્યાનપિ
સ્વં સર્વં તદધીનમેવ કુરુતેત્યેવં ભણત્યન્વહમ્ ॥ ૧૪૬॥

મચ્ચક્ષુઃપરિપેયકૌસ્તુભમણે નાવેક્ષ્ય મત્પાતકં
રક્ષાયૈ હૃદયે નિવેશિતમમું માં શોભમાનાજ્જલિમ્
મહ્યં દર્શયસે ભયં મમ પરં હર્તું કૃપામ્ભોનિધે
શ્રીશેષક્ષિતિભૃન્નિવાસ કમલાશુદ્ધાન્તવક્ષઃસ્થલ ॥ ૧૪૭॥

સ્વપ્રાણોશ્ચણ્ડપત્રોદ્દલિતનિજપદોદ્ઘદ્રજોવૈભવેન
સ્વાક્ષ્યાસ્યભ્રાટ્ સ્વનાભિં શ્રવણમપિ નિજં સ્વં ચ કં છાદયાદ્ભિઃ ।
ભ્રાજત્સત્ત્વૈસ્તમોભાવિવરણપટુભિર્જન્યસક્તૈઃ સ્વકૃત્તૈઃ
ભિન્નાક્ષો નસ્વગીઃસ્થૈઃ સ્વહૃદયશરણં ચારુગુર્માઃ પુનાતુ ॥ ૧૪૮॥

શ્રીભૃન્મામવ ચક્ષુષોશ્ચ હૃદયે વિન્યસ્ય મે સર્વદા
ત્વાં વર્તે વિશયોઽસ્તિ તે યદિ પરિત્યક્તેતરપ્રત્યયઃ ।
ત્વત્કારુણ્યદૃગાપતત્તરલસદ્ધારૈકપાત્રં તુ માં
કૃત્વા તત્ર વિલોકયોજ્જ્વલમતે મા મધ્વવાચ્યાદરઃ ॥ ૧૪૯॥

એહ્યત્ર મન્યેઽદ્ય હરિષ્યસે હૃદ્વૃષાદ્રિનાથેન હૃતં તદાસીત્
શબ્દાદિમેવં વિષયં હસદ્ભિર્નતિર્ગૃહીતા મમ સદ્ભિરસ્તુ ॥ ૧૫૦॥

હૃદ્વો હરિષ્યધ્વ ઇતીવ મન્યે વૃષાદ્રિભર્ત્રૈવ હૃતં પુરા તત્
ઇતિ પ્રકૃષ્ટાન્ વિષયાન્ હસદ્ભિર્નતિર્ગૃહીતા મમ સદ્ભિરતુ ॥ ૧૫૧॥

શુત્યાદ્યવગત્યાહતવૃત્ત્યા જડમત્યા-
ઽધૃત્યાઽધૃતિમત્યા પરવત્યા જનતત્યા ।
સત્યા ચિદુપેત્યા ક્ષિતિભૃત્યાપરવત્યાતતનિત્યા
પ્રીત્યા ભગવત્યાવિરભૂત્યાજ્યકુગત્યા ॥ ૧૫૨॥

શ્રીભ્વીટ્ કુધ્રભૃદબ્રુડુદ્ભવશિવેટ્છક્રાદિલેખેડ્યપ
ચ્છાર્ઙ્ગચ્છિન્નરિપુચ્છિદિદ્ધવિશિખાચ્છન્નચ્છવિદ્વિટ્છિરાઃ ।
કાર્તાર્થ્યાન્વહસંસ્ફુરત્સદઘધક્છેષક્ષિતિધ્રક્ષયો
દધ્યાત્સ્વસ્ત્યદરી દરીલસદરી નીલસ્સનીલસ્સ નઃ ॥ ૧૫૩॥

તવ મુખરુચિમામું સઙ્ઘશક્ત્યા સમાબ્જો

નખમિષદશવર્ષ્મા પાદયોસ્તે પપાત ।
અથ તદ સહમબ્જં છાદયત્ તં સગન્ધં
સ્વયમપિ બહુસઙ્ખ્યં તત્ફલાર્થં તથાભૂત્ ॥ ૧૫૪॥

શ્રયતિ યસ્ય વધૂર્હૃદયં સદા સ પુરુષોત્તમ ઇત્યનિશં હરિઃ ।
સ્વપુરુષોત્તમતામિવ બોધયન્ હૃદયવાસિરમઃ સ મુદેઽસ્તુ નઃ ॥ ૧૫૫॥

સ્વાંશં સ્વામિસરસ્યપારકુસુમે નૃણાં મુદે કાર્તિકે
દ્વાદશ્યાં સિતપક્ષકે પ્લવમુપારૂઢં વૃષાદ્રીશ્વરમ્ ।
દૃષ્ટ્વા દેવમુદે વિયત્સરસિ સત્સૂર્નેઽકદમ્ભો હરિઃ
સુપ્રેમ્ણોડુપમેત્ય નીલરચિતાં નીલઃ સ સઙ્ક્રીડતે ॥ ૧૫૬॥

અઘટિતઘટનાપટુતા યદિ તવ બહુલાઘમુત્તમાનન્દમ્ ।
શ્રીભૃત્ કુરુ માં નિત્યં સેવે ત્વાં ભવતિ હિ સ્વલાભસ્તે ॥ ૧૫૭॥

ત્વન્નામાનિ જપન્તં નિત્યં રક્ષસિ કથં ન માં શ્રીશ ।
લૌકિકશબ્દપરોઽહં કિં તેઽખિલશબ્દવાચ્યતા નો વા ॥ ૧૫૮॥

પરં પદમયં સ્વહ્યતોઽપ્યપરમેવ વા સ્યાન્ન ચેત્
પરાપરવિદાં વરા વૃષગિરીશ તે સૂરયઃ ।
કુતોઽન્યતમવસ્તુતામિહ ચરાચરેષ્વાત્મનામ્
અવેક્ષ્ય તદુપેક્ષ્ય તે નિકટદેહલીત્વં યયુઃ ॥ ૧૫૯॥

વૈકુણ્ઠાદ્વૃષશૈલ એવ પરમો યસ્માત્તતોઽત્રાગતઃ
તત્રત્યૈઃ સહ મોદસે કમલયા ભાન્ત્યત્ર તે સદ્ગુણાઃ ।
દ્યોસન્મર્ત્યપતત્પશુક્રિમિદૃશાં ગમ્યોઽત્ર પૂર્ણેનસઃ
દૃગ્યોગ્યોઽસિ મમાપિ હન્ત વિમુખાઃ પશ્યન્તિ તે સ્વામિતામ્ ॥ ૧૬૦॥

નિત્યે ધામ્નિ નમાનમક્ષમપિ નો સાક્ષી ન લિઙ્ગં ક્ષમં
નિત્યા ગીર્બહુભિઃ પરૈરિતરથા નીતા સ્વયં દર્શય ।
તન્મે વિશ્વસિમિ શ્રુતાઃ સ્વલુ ગતાયાતા ભવસ્થા ન ચેત્
તન્મે દર્શયસે ન તદ્વૃષગિરિઃ શ્રેષ્ઠઃ પરં શ્રીનિધે ॥ ૧૬૧॥

પૂર્વં ત્વં નિજધામની તુલયિતું વૈકુણ્ઠશેષાચલૌ
રોદઃપાત્રગતૌ વિધાય નિતરામૂર્ધ્વોદ્ગતં લાઘવાત્
ઉત્સૃજ્યાદિમમન્તિમં ગુરુતયાઽધઃસ્થં શ્રિતોઽસ્યાદરાત્
એતદ્જ્ઞાપયિતું તથૈવ જગતઃ કિં તૌ નિધત્સે સદા ॥ ૧૬૨॥

લક્ષ્મીલક્ષ્મ મહઃ પરં દધદિદં હૈમં વિદોષપ્રભૈઃ
સદ્રત્નૈઃ સહિતં તમઃપ્રતિભટં ધામાચલાત્મોત્તમમ્ ।
અત્યર્કાનલદીપ્રમક્ષરપદં વિષ્ણોરિતિ સ્વચ્છધી-
યોગીઙ્ગીર્વિષયઃ સ્વમિત્યનુદિનં વક્તીવ વીનાં રવૈઃ ॥ ૧૬૩॥

ધામ્ન્યસ્મિન્ બહુલક્ષપાપિ વિલદ્ભૂભૃન્મહારાજતે
સ્રગ્લગ્નભ્રમરાલિધીદતનુભાતિશ્યામહારાજ તે ।
પ્રાકારે સ્ફુરિતૈર્વિમાનમણિરાડ્ભાસામહા રાજતે
જાલૈર્ધ્વાન્તહરૈઃકૃતપ્રિયલસત્કોકીમહા રાજતે ॥ ૧૬૪॥

ત્યક્તવા સ્વાર્થગણં પરાર્થઘટકઃ સત્પૂરુષઃ કીર્તિતઃ
વાત્સલ્યાદિભવદ્ગુણાતિમહસે સોઢ્વાપિ દુઃખવ્રજમ્ ।
દોષાનેવ સદા કરોડપિ સુખદં પુણ્યં ન કિઞ્ચિત્ક્વચિત્
તસ્માત્સત્પુરુષં ભવદ્ધિતપરં લક્ષ્મીશ રક્ષસ્વ મામ્ ॥ ૧૬૫॥

કસ્મૈચિન્મહતે પ્રસન્નમનસા ભૂપેન દત્તં વરં
ગ્રામં તસ્ય સુતાદયોડપ્યનધિકા દાસાશ્ચ ભૂપાવિદઃ ।
લોકે ભુજ્જત એવ તદ્વદહમપ્યજ્ઞોડપિ તેડજ ત્વયા
પૂર્વાચાર્યવશીકૃતં તવ પદં ભોક્ષ્યે હિ તદ્દાસ્યતઃ ॥ ૧૬૬॥

શ્રીશ ત્વન્નિકટે પુરાર્થિતવતે માદૃક્સ્વકીયાવલી-
યુક્તસ્વસ્ય શઠદ્વિપે કરુણાયા ત્વં તત્ફલં પ્રાદિશઃ ।
બહ્વેકત્વનિરૂપણોત્કવચના શ્રીસૂક્તિરસ્યાદિમા
સિદ્ધોદર્કમિવૈતદીયમવદન્માં કાસ્તિ ચિન્તા મમ ॥ ૧૬૭॥

કૂરેશઃ સ્વપદાશ્રિતાય હિ ચતુર્ગ્રામાય લબ્ધૈનસે
ત્વાં તસ્મિન્ વિલસત્ક્રુધં સમુદિતક્ષાન્તિં વિધાય સ્વયમ્ ।
સ્વસ્મૈ દત્તમદાપયત્ફલમતઃ શ્રીશ ત્વયાર્યોડપિ મે
પૂર્ણાધાય ચ દાપયિષ્યતિ ફલં સ્વીયં મમત્વાશ્રયઃ ॥ ૧૬૮॥

કા કર્મજ્ઞાનભક્તિપ્રપદનવિરહાત્ પાતકેભ્યશ્ચ ભીર્મે
સ્વાઙ્ઘ્રૌ બદ્ધાજ્જલીનામભિનયતિ હરિર્જાનુદઘ્નં ભવાબ્ધિમ્ ।
ઉદ્દિશ્યૈનં કદાચિત્કથમપિ ચ સકૃત્ક્વચિન્મેડજ્જલિઃ સ્યા-
દાર્યોક્તોડશક્તિબુદ્ધેરભિમતસુખકૃચ્છક્તલક્ષ્યં પરં હિ ॥ ૧૬૯॥

મન્દો હન્ત જનોડનવધિસુખદે સઙ્કલ્પમાત્રાદ્વધૂ-
પુત્રાદ્યૈહિકલોકદાયિનિ હરેર્નત્યેકલભ્યે સ્થિરે ।

હૈમે ધામ્નિ નધીઃ ક્ષરાલ્પસુખદાલભ્યાધિકાનર્થદ-
સ્ત્રીહેમાયતિકાઙ્ક્ષયાત્ર બહુધા નિચત્વમાપદ્યતે ॥ ૧૭૦॥

ઉત્પૂલુત્ય ત્વરયા સુશીલકણો વૈકુણ્ઠતોઽમું શ્રિતઃ
ચિહં ભૂધરનિમ્નતા ક્કનુ ગતા સા તે ત્વરા વશ્યવે ।
દીનસ્યાત્યધિનોઽગતેર્મમ પુરો ન પ્રાદુરાસીઃ કુતઃ
શ્રીભૃલ્લોકુગુણસ્તવાપિ કિમભૂદ્ધીમાન્ધમસ્યૈનસા ॥ ૧૭૧॥

ભક્તયઙ્ગં કિમુત પ્રપત્તિમિલિતો હેત્વન્તરં વા ફલં
હેતુર્નાન્યફલસ્ય કૃત્સ્નમપિ નો કિઞ્ચિત્ત્વયૈવાજ્જલિમ્ ।
ત્વત્પાદેઽરચયં કથાઞ્ચિદવ વા મા વાઽઘમગ્નં તુ માં
કુર્વસ્યાનમતશ્ચિનત્સિ તુ કરં દીનઃ કરોમીશ કિમ્ ॥ ૧૭૨॥

વિલોક્ય મમ દેશિકં વરભવત્પદૈકાશ્રયં
અકિઞ્ચનમસદ્ગતિં બહુલપાપમગ્નાશયમ્ ।
ત્વદઙ્ઘ્રિશરણાગતિં કથમપીરયન્તં જડં
ન વીક્ષ્ય મમ દુષ્ટતાં સ્વકૃતવિત્ત્વમેવાવ મામ્ ॥ ૧૭૩॥

દુઃખં માં શરણાગતં ભજતિ ચેત્ક્રન્દામિ તદ્દર્શિનઃ
તન્ન સ્યાદ્યદિ તે દયાવિરહિતઃ સ્યાસ્તદ્ભવેત્ તે યદિ ।
નિર્દોષો ન ભવેર્દ્વિધા શ્રુતિશતોત્સાદસ્તથાન્યશ્રુતેઃ
સિધ્યેન્નૈવ કિમપ્યતઃ પરમમું રક્ષાખિલાઘવ્રજાત્ ॥ ૧૭૪॥

વાચામગોચરમનન્તમનન્યનિષ્ટં
શ્રુત્યાદિસિદ્ધમનિશં ગુણમણ્ડલં તે ।
આચ્છાદ્યપૂર્વમિદમેવ મમાપિ ચિત્રં
અસ્યૈકદૈવ હિ વિરુદ્ધભયાભયે સ્તઃ ॥ ૧૭૫॥

કામાદિદોષનિવહઃ પરિવર્ધતે મે
જાનન્નધીરપિ સદા રચયામ્યઘાનિ ।
દુસ્સઙ્ગતૌ રુચિરતોઽનુશયઃ કદાપિ
નોદેતિ હન્ત કથમીદૃગહં તરેયમ્ ॥ ૧૭૬॥

રાગં વિવર્ધય ભવચ્ચરણારવિન્દે
દોષેષુ યત્નમનિશં વિફલં કુરુષ્વ ।
બાલાદ્યવદ્યપરિહારનયાદયુક્તં
મા દર્શયાર્જય સદા ભવદીયસઙ્ગમ્ ॥ ૧૭૭॥

હાતું નાથ નભોગતાં વૃષધરાવાસ ત્વમાસીદ્ઘનઃ
ચિહ્નં ચામૃતદત્વમાશ્રયવિનાભાવાસહાઽગાત્ તટિત્ ।
અસ્થૈર્યે વિમનાશ્ચ માત્વમિહતે વક્ષસ્યલોલસ્થિતૌ
લક્ષ્મ્યાં શ્રીશ્ચપલેતિ લોકવચનં વિદ્યુન્મયત્વાર્થકમ્ ॥ ૧૭૮॥

કાંશ્ચિદ્રક્ષસિ માં કુતો ન બહુના પાપેન ચેત્તત્કૃતં
મન્દં મામનિવારયન્ મયિ વસન્ દક્ષઃ કિલાકારયઃ ।
કૂપાન્તર્નિપતન્તમર્ભકમલં પશ્યન્ત્યુપેક્ષાપરા
માતાઽપાતયદેવ તત્ત્વદુદિતં પાપં નિવર્ત્યાવ મામ્ ॥ ૧૭૯॥

અન્તઃસ્થો જગતાં જનિસ્થિતિલયાન્ કુર્વન્નિયન્તા સ્વરાટ્
દુષ્ટધ્ઘે જનનાદિભાક્ સ્વમનસા શ્રુત્યાદિમાનોઽપ્યહમ્ ।
ન ત્વં સાક્ષ્યવદઃ પ્રમાણમશુભં વાચા કિમેવંવિધઃ
ત્વં ચેન્મામવ પાતકાદકપટં ત્વાં નિશ્ચિનોમીદૃશમ્ ॥ ૧૮૦॥

કુર્વે દુઃખકરાણ્યઘાનિ મનસા કસ્માદહં વાસના-
મોહાદ્યૈરિતિ ચેદમૂનિ કિમુ તે વશ્યાન્યવશ્યાનિ વા ।
આદ્યે તૈસ્ત્વમકારયઃ સ્વકરણૈર્વશ્યો ન દણ્ડ્યોઽસ્મ્યહં
પિત્રાજ્ઞારચિતસ્વમાતૃનિધનઃ કિં જામદગ્ન્યોઽઘભાક્ ॥ ૧૮૧॥

અન્ત્યે યદ્યલયાનિ તાનિ ન સુખં સ્યાત્કસ્યચિત્કિં ત્વયા
શ્રીયન્તે યદિ જાતુચિત્કથમપિ શ્રીનાથ કિં વા ત્વયા
ત્વત્તશ્ચેત્તદવારકઃ શકનવાન્નાકારયોઽઘં કુતઃ
મચ્ચેત્કિઞ્ચિદપેક્ષસે ન હિ ભવેઃ પૂર્ણસ્તતો રક્ષ મામ્ ॥ ૧૮૨॥

નિર્બીજં મમ રક્ષણે નિખિલચિન્મુક્તિપ્રસઙ્ગો યદિ
સ્યાન્નૌ કા ક્ષતિરક્ષરં તવ પદં વર્ધેત હીદક્ષ્યાત્ ।
લોકોઽયં સકલઃ સુખૈકનિલયઃ સ્યાદ્વા જનાયં વિના
લીલા તે ન ઘટેત ચેત્તવ કૃતે દુઃખપ્રદસ્ત્વં ભવેઃ ॥ ૧૮૩॥

સ્વાજ્ઞાભેદનિજસ્વહૃત્યપદવીચારસ્થિરં પ્રાયશો
દણ્ડૈરપ્યનિવૃત્તમેવ નિધનાનર્હં સ્વકીયં પ્રભુઃ ।
સ્વેચ્છાચારનિરોધકે દૃઢતરે ધામ્નિ સ્વકે પાતય-
ત્યેવમ્ભૂતમમું રમાધવ કુતો મા પાતયસ્યક્ષરે ॥ ૧૮૪॥

બાલં કર્મપિતાપ્યકાર્યશતકં કૃત્વાપ્યદોષોઽવતિ

ત્વં તાતોઽનુપધિઃ સ્વરાડશરણં દીનં જડં મામમુમ્ ।
મર્યાદામનવપ્રમાણગદિતામુત્સૃજ્ય વા પાસિ ચેત્
કા તે હાનિરનીદૃશેષુ ભવતાત્ સા સર્વવિચ્છીનિધે ॥ ૧૮૫॥

મર્યાદામવધીર્ય ચક્રમધરો વિપ્રાત્મજાનક્ષરં
ધામારોપ્ય પુનર્દ્વિજાય સમદાસ્તસ્માત્સમાનીય તાન્ ।
ઘણ્ટાકર્ણમુખદ્વિષઃ સમનયો મુક્તિં પરાં શ્રીનિધે
સન્ત્યન્યાનિ નિદર્શનાનિ ચ શતં મય્યેવ સા પાલ્યતે ॥ ૧૮૬॥

ચેતોવાક્તનુકર્મભિઃ ક્ષરતમૈઃ કાલાન્તરે કાર્યકૃત્
કલ્પ્યં કર્તૃગતં સ્વતસ્ત્વકુશલં કિઞ્ચિદ્ ગતં લાઘવાત્ ।
વિદ્વત્કારકધર્મતાં તદિહ તે કોપો હિ મદ્ગોચરઃ
પાપં મે ત્વદનુગ્રહેઽત્ર પરમે કુત્રૈષ તિષ્ઠેદ્ધરે ॥ ૧૮૭॥

કસ્માન્નાવસિ માં હરે મયિ ગુણો નાસ્તીતિ ચેત્ કિં ત્વયા
દોષે સત્યવિતું યથા ન નિપુણો નૈવં ગુણે શિક્ષિતુમ્ ।
રક્ષારક્ષણયોર્ગુણાગુણગતા સ્યાદ્દક્ષતા તદ્ભવ-
ન્નાથત્વાય સદોષમસ્તગુણમપ્યેતં પ્રભો રક્ષ મામ્ ॥ ૧૮૮॥

વીક્ષ્ય શ્રીટ્ પ્રભુતાં ભયાત્તવ મુદે ભ્રાન્ત્યા નુ મુગ્ધં જનઃ
ત્વામાહાખિલવેદિનં સ્વમવતિ સ્વાર્થાર્થમેવ સ્વવાન્ ।
સ્વસ્ય સ્વાનવને ક્ષતિઃ સ્વમવિતું સ્વં નૈવ દક્ષં ત્વિતિ
ત્વં નો વેત્સ્યથ વેત્સિ ચેત્કથમમું સ્વામિન્ન માં રક્ષસિ ॥ ૧૮૯॥

નામ્બામમ્બેતિ તાતેત્યપિતરમપિ કિં વક્ષ્યસિશોઽપિ યાચ્ઞાં
દૌત્યં વા સારથિત્વં ગિરિધૃતિમવનેરુદ્ધૃતિં વા વનાન્તે ।
સઞ્ચારં દૈત્યરક્ષોબહુવિધનિધનં દાવપાનં દયાલો
મદ્રક્ષાર્થં [કરિષ્યસ્યજિત બત કુતો મુગ્ધવત્તિષ્ટસિ ત્વમ્] ॥ ૧૯૦॥

॥ ઇતિ શ્લોકાનિમાન્ સપ્ત શ્રીનિવાસગુણાકરે ॥

॥ શ્રીશૈલસ્તાતયાચાર્યો વ્યાખ્યયા સમયોજયત્ ॥

॥ ઇતિ શ્રીનિવાસગુણાકરઃ ॥

॥ યાવદુપલબ્ધઃ ॥

From a telugu book veNkaTeshakAvyakalApa

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

*shrInivAsaguNAkaraH*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*